सङ्कटः, त्रि, (सम् + "संप्रोदश्च कटच्।" ५। २। २९। इति कटच्।) संबाधः। इत्यमरः॥ हे अल्पावकाशे वर्त्मादौ। सम्यक् कटति आवृणोति सङ्कटं पचाद्यच्। सम्यगन्योन्यं बाधन्तेऽत्र संबाधः घञ्। वाच्यलिङ्गता च। संबाधं ह्रदपि तदभूव वर्त्म इति माघः। इति भरतः॥ दुःखे, क्ली। यथा,—

"सर्व्वाबाधासु घोरासु वेदनाभ्यर्दितोऽपि वा।
स्मरन्ममैतच्चरितं नरो मुच्येत सङ्कटात्॥"

सङ्कटं दुःखमुत्तरार्द्धमुत्तरान्वयि। इति देवीमाहात्म्यस्य टीकायां नागोजीभट्टः॥

सङ्कटा, स्त्री, (सम्यक् कटति आवृणोति या। सम् + कट् + अच्। टाप्।) देवीविशेषः। सा च काश्यां प्रसिद्धा। योगिनीविशेषः। यथा,—

"मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा।
उल्का सिद्धिः सङ्कटा च योगिन्योऽष्टौ प्रकीर्त्तिताः॥"

इति ज्योतिषम्॥

सङ्कटाक्षः, पुं, (संकटं अक्षतीति। अक्ष व्याप्तौ + अण्।) धववृक्षः। इति विश्वः॥

सङ्कथनं, क्ली, (सम्यक् कथनम्।) सम्यग्भाषणम्। यथा,—

"उपवासफलं नश्येत् दिवास्वप्नाच्च मैथुनात्।
स्त्रीणां सम्प्रेक्षणात् स्पर्शात्ताभिः सङ्कथनादपि॥"

इत्येकादशीतत्त्वम्॥

सङ्कथा, स्त्री, (सम्यक् कथा।) परस्परभाषणम्। यथा,—

"उल्लापः काकुवागन्योन्योक्तिः संलापसङ्कथे।"

इति हेमचन्द्रः॥

(यथा, भागवते। १०। ८२। १७।

"पृथा भ्रातॄन् स्वसॄर्वीक्ष्य तत्पुत्त्रान् पितरावपि।
भ्रातृपत्नीर्मुकुन्दञ्च जहौ संकथया शुचः॥")

सम्यक्कथनञ्च॥

सङ्करः, पुं, (सङ्कीर्य्यते इति। सं + कॄ विक्षेपे + अप्।) सम्मार्ज्जन्या क्षिप्तधूल्यादिः। तत्पर्य्यायः। अवकरः २। इत्यमरः॥ सङ्कारः ३। इति शब्दरत्नावली॥ अग्निचटत्कारः। इति। मेदिनीहारावल्यौ॥ मिश्रितत्वम्। यथा,—

"भेदाख्यानाय न द्वन्द्वो नैकशेषो न सङ्करः।"

इत्यमरः॥

परस्परात्यन्ताभावसमानाधिकरणयोरेकाधिकरण्यम्। यथा। मूर्त्तत्वं मनसि वर्त्तते भूतत्वं नास्ति आकाशे भूतत्वं वर्त्तते मूर्त्तत्वं नास्ति। पृथिव्यां भूतत्वं वर्त्तते मूर्त्तत्वञ्चास्तीति जातिसाङ्कर्य्यम्। तथा चोक्तम्।

"व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः।
रूपहानिरसम्बन्धो जातिबाधकसंग्रहः॥"

इति सिद्धान्तमुक्तावली॥ *॥

वर्णसङ्करजातिः। यथा,—

याज्ञवल्क्य उवाच।

"वक्ष्ये सङ्करजात्यादि गृहस्थादिविधिं परम्।
विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां विशः स्त्रियाम्॥
जातोऽम्बष्ठस्तु शूद्रायां निषादः पार्शतोऽपि वा।
माहिष्योग्रौ प्रजायेते विट्शूद्राङ्गनयोर्नृपात्॥
वैश्यां शूद्राच्च राजन्यां माहिष्योग्रौ सुतौ स्मृतौ।
शूद्रायां करणो वैश्यात् विद्वान् एष विधिः स्मृतः॥
ब्राह्मण्यां क्षत्त्रियात् सूतो वैश्याद्वैदेहकस्तथा।
शूद्राज्जातस्तु चाण्डालः सर्व्वधर्म्मबहिष्कृतः॥
क्षत्त्रिया मागधं वैश्यात् शूद्रात् क्षत्तारमेव च।
शूद्रादायोगवं वैश्या जनयामास वै सुतम्॥
माहिष्येण करण्यान्तु रथकारः प्रजायते।
असत्सन्तस्तु विज्ञेयाः प्रातिलोमानुलोमजाः॥
जात्युत्कर्षाद्द्विजो ज्ञेयः सप्तमे पञ्चमेऽपि वा।
व्यत्यये कर्म्मणां साम्ये पूर्व्ववच्चोत्तरावरम्॥"

इति गारुडे ९६ अध्यायः॥

सङ्करी, स्त्री, (सं + कॄ + अप्। गौरादित्वात् ङीष्।) नवदूषितकन्या। इति मेदिनी॥

सङ्करीकरणं, क्ली, (असङ्करः सङ्करः क्रियतेऽनेनेति। सङ्कर + कृ + ल्युट्। अभूततद्भावे च्विः।) नवविधपापान्तर्गतपापविशेषः। यथा, विष्णुः। अथ पुरुषस्य कामक्रोधलोभाख्यं रिपुत्रयं भवति। परिग्रहप्रसङ्गेन विशेषादगृहाश्रमिणः। तेनायमाक्रान्तोऽतिपातकमहापातकानुपातकोपपातकेषु वर्त्तते। जातिभ्रंशकरेषु सङ्करीकरणेष्वपात्रीकरणेषु मलावहेषु प्रकीर्णकेषु। तद्यथा,—

"खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा।
सङ्करीकरणं ज्ञेयं मीनाहिमहिषस्य च॥"

तस्य प्रायश्चित्तं यथा,—

"सङ्करापात्रकृत्यासु मासं शोधनमैन्दवम्।
मलिनीकरणीयेषु तप्तः स्याद्यावकस्त्र्यहः॥"

तथा विष्णुः।

"ग्राम्यारण्यानां पशूनां हिंसा सङ्कीर्णीकरणम्।
सङ्करीकरणं कृत्वा मासमश्नीत यावकम्।
कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तन्तु कारयेत्॥"

इति प्रायश्चित्तविवेकः॥

सङ्कर्षणं, क्ली, आकर्षणम्। सम्यक्प्रकारेण कर्षणम्। संपूर्व्वकृषधातोरनट्प्रत्ययेन निष्पन्नम्॥ (यथा, भागवते। १०। २। १३।

"गर्भसंकर्षणात् तं वै प्राहुः सङ्कर्षणं भुवि॥"

एकीकरणम्। इति स्वामी॥ यथा, भागवते। ५। २५। १।

"तस्य मूलदेशे त्रिंशद्योजनसहस्रान्तरे आस्ते या वै कला भगवतस्तामसी समाख्याता अनन्त इति सात्वतीया द्रष्टृदृश्ययोः सङ्कर्षणं अहमित्यभिमानलक्षणं यं सङ्कर्षण इत्याचक्षते॥")

सङ्कर्षणः, पुं, (सम्यक् कर्षतीति। सं + कृष् + ल्युः।) बलदेवः। इत्यमरः॥ (अस्य नामनिरुक्तिर्यथा, हरिवंशे। ५९। ६।

"कर्षणेनास्य गर्भस्य स्वगर्भाच्चावितस्य वै।
सङ्कर्षणो नाम शुभे तव पुत्त्रो भविष्यति॥"

तथा च भागवते। १०। २। १३।

"गर्भसंकर्षणात् तं वै प्राहुः सङ्कर्षणं भुवि॥")

सङ्कलः, पुं, सङ्कलनम्। योगः। संपूर्व्वकलधातोर्भावे अल्प्रत्ययेन निष्पन्नः॥

सङ्कलनं, क्ली, (सं + कल + ल्युट्।) एकत्रीकरणम्। योजनम्। इति लीलावती॥ ठिक देओया इति भाषा॥

सङ्कलितः, त्रि, (सं + कल + क्तः।) लेखादिना संहतः। तत्पर्य्यायः। संगूढः २। इत्यमरभरतौ॥ योजिताङ्कम्। ठिक देओया आँक इति भाषा। यथा। अथ सङ्कलितव्यवकलितयोः करणसूत्रम्। इति लीलावती॥ पुञ्जीकृतधान्यादि। इति केचित्॥

सङ्कल्पः, पुं, (सं + कृप + भावे घञ्। गुणे कृते रस्य लः।) कर्म्मणो मानसम्। इत्यमरः॥ "सङ्कल्प उक्तो हारीतेन। यथा। मनसा सङ्कल्पयति वाचा अभिलपति कर्म्मणा चोपपादयति इति। भविष्यपुराणवचनेन च।

'सङ्कल्पेन विना राजन् यत्किञ्चित् कुरुते नरः।
फलञ्चाल्पाल्पकं तस्य धर्म्मस्यार्द्धक्षयो भवेत्॥'

इति। ब्रह्मपुराणेनापि।

'आशास्य च शुभं कार्य्यमुद्दिश्य च मनोगतम्'।

इत्यगस्त्यपूजने उक्तम्। मनोगतं शुभं फलं आशास्य मनसा सङ्कल्प्य उद्दिश्य वाचा अभिलप्य कार्य्यं कर्म्मणा उपपाद्यम्। भविष्ये।

'शुक्तिशङ्खाश्महस्तेश्च कांस्यरूप्यादिभिस्तथा।
सङ्कल्पो नैव कर्त्तव्यो मृण्मयेन कदाचन॥
गृहीत्वौडुम्बरं पात्रं वारिपूर्णं गुणान्वितम्।
दर्भत्रयं साग्रमूलं फलपुष्पतिलान्वितम्॥
जलाशयारामकूपे सङ्कल्पे पूर्वदिङ्मुखः।
साधारणे चोत्तरास्य ऐशान्यां निक्षिपेज्जलम्॥'

अत्र केवलहस्तनिषेधस्तु पात्रान्तरसद्भावविषयः। शङ्खादिसाहचर्य्यात् एकहस्तपरो वा।

'गृहीत्वौडुम्बरं पात्रं वारिपूर्णमुदङ्मुखः।
उपवासन्तु गृह्णीयाद् यद्वा वार्य्येव धारयेत्॥'

इति वराहपुराणदर्शनात्।" इति तिथ्यादितत्त्वम्॥ *॥ सङ्कल्पश्च भावे मयैतत् कर्त्तव्यमेव निषेधे तु मयैतन्न कर्त्तव्यमिति ज्ञानविशेषः। व्रतादीनां सङ्कल्पसम्भवत्वं यथा,—

"सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः।
व्रता नियमधर्म्माश्च सर्वे सङ्कल्पजाः स्मृताः॥"

इत्येकादशीतत्त्वम्॥

तद्वाक्यरचना यथा,—

"ओपञ्च पूर्वमुच्चार्य्य ततो विष्णुपदं वदेत्।
ओँ तत् सदित्युच्चार्य्य नाम गोत्रं ततो वदेत्॥
तत इष्टप्रीतिकामो मूलबीजं समुच्चयेत्।
स्त्रीऽस्याच्च वरारोहे गङ्गास्नानमहं ततः॥
करिष्ये इति सङ्कल्प्य शिरःस्नानं समाचरेत्।
त्रिःस्नात्वा चञ्चलापाङ्गि! इति—वाक्यं सुराचिते!॥